आजग्रोभाञ्जनजलैर्भावयेच्च पुनः पुनः ।
शिग्रुमूलेन केतक्याः पुष्पपत्रपुटे च तम् ॥
पचेदेवं विशुद्धः सन् मृगनाभिसमो भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥
दुर्गन्धविशिष्टे, त्रि । यथा, भगवद्गीतायाम् । १७ । १० ।
"यातयामं गतरसं पूति पर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥")

पूतिकं, क्ली, ( पूत्या दुर्गन्धेन कायतीति । कै + कः । ) विष्ठा । इति राजनिर्घण्टः ॥ ( दुर्गन्धविशिष्टे, त्रि । यथा, महाभारते ।१३।८।११।
"किं त्वया पापकं पूर्ब्बं कृतं कर्म्म सुदारुणम् ।
यस्त्वं श्मशाने मृतकान् पूतिकानत्सि कुत्सितान् ॥" )

पूतिकः, पुं, ( पूत्या कायतीति । कै + कः । ) पूतिकरञ्जवृक्षः । इत्यमरः । २ । ४ । ४८ ॥ (अस्य पर्य्यायादिकं पूतिकरञ्जशब्दे द्रष्टव्यम् ॥)

पूतिकरजः, पुं, ( पूतियुक्तः करजः । ) करञ्जभेदः । इत्यमरः ।२।४।४८॥ यथा, "अथ कटुकरञ्जघोराकरञ्जनामगुणाः ।
करञ्जो नक्तमालश्च करजश्चिरविल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ॥
स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ।
करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषहृत् ॥
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ।
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ॥
भेदनं कटुकं पाके वीर्य्योष्णं पित्तलं लघु ।
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् ॥
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )

पूतिकरञ्जः, पुं, ( पूतियुक्तः करञ्जः । ) करञ्जविशेषः । नाटाकरञ्ज इति भाषा । कटकरेज इति हिन्दी भाषा । तत्पर्य्यायः । प्रकीर्य्यः २ पूतिकरजः ३ पूतीकरजः ४ पूतिकः ५ पूतीकः ६ कलिकारकः ७ कलिमालकः ८ कलहनाशनः ९ । इत्यमरभरतौ ॥ प्रकीर्णः १० रजनीपुष्पः ११ सुमनाः १२ पूतिकर्णिकः १३ कैडर्य्यः १४ कलिमाल्यः १५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्त्तिकण्डूविचर्च्चिकाकुष्ठसर्व्वत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,
"स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )

पूतिकर्णः, पुं, ( पूतिर्दुर्गन्धः कर्णो यस्मात् । ) कर्णरोगविशेषः । तल्लक्षणं यथा,—
पूतिकर्णमाह ।
"कर्णविद्रधिपाकाद्वा स कर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः ॥"
कर्णस्रावाद्भेदार्थमाह ।
पूतीति नियमेन पूति यथा स्यादेवं स्रवति ॥
तच्चिकित्सा यथा,—
"कर्णस्रवे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥
सर्ज्जिकाचूर्णसंयुक्तबीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥१॥
आम्रजम्बुप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥ २ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ ३ ॥
इष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थे तत् स्रावे पूतिकर्णके ॥४॥
कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम् ॥
कुष्ठादितैलम् ॥ ५ ॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति ॥ ६ ॥
चूर्णेन गन्धकशिलारजनीभवेन
सूर्य्यांशकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाडीं जयेच्चिरभवामपि कर्णजाताम् ॥
मुष्टिः पलम् ॥ ७ ॥
कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥"
इति भावप्रकाशः ॥
( चिकित्सास्य यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजो गुडः ।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ॥"
इत्युत्तरतन्त्रे एकविंशेऽध्याये सुश्रुतेनोक्तम् ॥ )

पूतिकर्णकः, पुं, ( पूतिः कर्णो यस्मात् । कप् । ) कर्णरोगभेदः । तस्य लक्षणम् । यथा,—
"कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात् ।
पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः ॥"
इति माधवकरः ॥
( लक्षणान्तरमस्य यथा,—
"स्थिते कफे स्रोतसि पित्ततेजसा
विलाप्यमाने भृशसम्प्रतापवान् ।
अवेदनो वाप्यथवा सवेदनो
घनं स्रवेत् पूति स पूतिकर्णकः ॥"
इत्युत्तरतन्त्रे विंशेऽध्याये सुश्रुतेनोक्तम् ॥ )
औषधं यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजोगुडः ।
पूरणात् पूतिकर्णस्य शमनो मधुसंयुतः ॥"
अथवा ।
"वरुणार्द्रकपित्थाम्रजम्बूपल्लवसाधितम् ।
पूतिकर्णापहं तैलं जातीपत्ररसेन वा ॥"
इति चक्रपाणिदत्तः ॥
( चिकित्सास्य यथा,—
"इष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके ॥"
इति चोत्तरतन्त्रे एकविंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥ )

पूतिका, स्त्री, ( पूत्या कायतीति । कै + कः । टाप् । ) मार्जारी । इति राजनिर्घण्टः ॥ ( कीटविशेषः । यथा, पञ्चतन्त्रे । ३ । ६६ ।
"पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्त्येषु येषां धर्म्मो न कारणम् ॥")
लताशाकविशेषः । इत्यमरटीकायां भरतः ॥ पुँइ इति भाषा ॥ अस्याः पर्य्यायगुणौ उपोदकीशब्दे द्रष्टव्यौ ॥ द्वादश्यां तद्भक्षणे दोषो यथा । पूतिका ब्रह्मघातिका । यदपि ।
'कुसुम्भं नालिकाशाकं वृन्ताकं पौतिकीन्तथा ।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः ॥'
इत्युशनसा सामान्यतोऽभिहितम् । अत्र नालिका श्वेतकलम्बीति कल्पतरुः । पूतिका च द्वादश्यामधिकदोषाय शूद्रविषयिका वा ।" इति तिथितत्त्वम् ॥ ( इयं हि सोमांशुतो जातेति सोमस्यालाभे प्रतिनिधित्वेन ग्राह्या । यथा, महाभारते । ३ । ३५ । ३३ ।
"अस्ति माषः प्रतिनिधिर्यथा प्राहुर्मनीषिणः ।
पूतिकामिव सोमस्य तथेदं क्रियतामिति ॥")

पूतिकामुखः, पुं, (पूतिकाया मुखमिव मुखं यस्य ।) शम्बूकः । इति शब्दमाला ॥ ( शम्बूकशब्देऽस्य विषयो ज्ञेयः ॥ )

पूतिकाष्ठं, क्ली, ( पूति काष्ठमिति कर्म्मधारयः । ) देवदारु । सरलवृक्षः । इत्यमरः । २ । ४ । ५४, २ । ४ । ६० ॥ पवित्रदारु च ॥

पूतिकाष्ठकं, क्ली, ( पूतिकाष्ठ + स्वार्थे कन् । ) सरलवृक्षः । इति शब्दचन्द्रिका ॥

पूतिगन्धं, क्ली, ( पूतिर्गन्धो यस्य । ) रङ्गम् । इति राजनिर्घण्टः ॥

पूतिगन्धः, पुं, ( पूतिर्गन्धो यस्य । ) गन्धकः । इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥ दुर्गन्धे, त्रि ॥ ( यथा, मनुः । ४ । १०७ ।
"नित्यानध्याय एव स्यात् ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥")

पूतिगन्धिः, त्रि, ( पूतिर्गन्धो यस्य । "गन्धस्येदुत्पूतिसुसुरभिभ्यः ।" ५ । ४ । १३५ । इति इः । ) दुर्गन्धः । इत्यमरः । १ । ५ । १२ ॥ पूतिविट् पूतिरिव गन्धोऽस्य । इति रायमुकुटः ॥ ( यथा, महाभारते । २ । ६० । २८ ।
"अव्याधिजं कटुकं तीक्ष्णमुष्णं
यशोमुषं परुषं पूतिगन्धि ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज ! पिब प्रशाम्य ॥")

पूतिगन्धिकः, त्रि, ( पूतिगन्धि + स्वार्थे कन् । ) दुर्गन्धः । इति हेमचन्द्रः । ६ । २७ ॥

पूतिगन्धिका, स्त्री, ( पूतिगन्धोऽस्त्यस्या इति । पूतिगन्ध + ठन् । ) वाकुची । इति राजनिर्घण्टः ॥

पूतितैला, स्त्री, ( पूति दुर्गन्धं तैलं यस्याः । ) ज्योतिष्मती । इति रत्नमाला । नयाफट्की इति भाषा ॥ ( पर्य्यायोऽस्या यथा,—
"पारावतपदी पिण्या नगणास्फुटबन्धनी ।
ज्योतिष्मती पूतितैला केचित्तामिङ्गुदीं विदुः ॥"
इति वैद्यकरत्नमालायाम् ॥ )